| अथानुपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| एतानि त्रीणि ज्ञानतः अत्यन्ताभ्यासे अज्ञानकृतब्रह्महत्यासमानि। यागस्थयोः क्षत्रियवैश्ययोर्वधः। ४। गर्भिणीवधः। ५। रजस्वलावधः। ६। अत्रिगोत्रावधः। ७। ब्राह्मणव्यतिरिक्ताविज्ञातगर्भवधः। ८। शरणागतवधः। ९। एतानि च अज्ञानकृतब्रह्महत्यासमानानि। | | | | |
| ब्रह्मोज्झता। सा च असच्छास्त्राभियोगेन अधीतवेदविस्मरणम्। १। वेदनिन्दा। अर्थतो ग्रन्थतश्च।२। कौटसाक्ष्यम्। ३। सुहृद्वधः। स च ब्राह्मणव्यतिरिक्तमित्रवधः। ४। गर्हितान्नजग्धिः। सा च ज्ञानतोऽत्यन्ताभ्यासेन अन्त्यजान्नभोजनम्। ५। गर्हिताद्यजग्धिः। ज्ञानतोऽत्यन्ताभ्यासेन छत्राकलशुनादिभोजनम्। ६। एतानि षट् अज्ञानकृतसुरापानसमानि। | द्वादशवार्षिकव्रतम्। | १८० धेनवः। | ५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| ब्राह्मणसम्बन्धिनिःक्षेपहरणम्। १। नरा२श्व३रजत४भूमि५वज्र६मणीना७ञ्चाभ्यासेन हरणम्। एतानि सप्त ब्राह्मणस्वामिकाशीतिरक्तिकापरिमितसुवर्णस्तेयसमानि। | ज्ञानतो द्वादशवार्षिकव्रतम्। अज्ञानतस्तदर्द्धम्। | १८० धेनवः। | ५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| सपिण्डस्त्रीगमनम्। १। ब्राह्मणकुमारीगमनम्। २। चाण्डालादिस्त्रीगमनम्। ३। सवर्णमित्रस्त्रीगमनम्। ४। पुत्त्रस्यासवर्णस्त्रीगमनम्। ५। औरसेतरपुत्रभार्य्यागमनम्। ६। पितृष्वसृगमनन्। ७। मातृष्वसृगमनम्। ८। गन्तारमपेक्ष्य हीनवर्णपितृपत्नीगमनम्। ९। पितृव्यपत्नीगमनम्। १०। मातामहपत्नीगमनम्। ११। मातुलपत्नीगमनम्। १२। श्वश्रूगमनम्। १३। स्वसृगमनम्। १४। ज्येष्ठभ्रातृपत्नीगमनम्। १५। राजपत्नीगमनम्। १६। श्रोत्रिय- | ज्ञानतो महापातकोक्तप्रकारेण मरणं तद्दे कल्पिकं चतुर्विंशतिवार्षिकव्रतम्। | ३६० धेनवः। | १०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा। | २०० गावः। अशक्तौ २०० कार्षापणाः। |
| | अज्ञानतो१२ द्वादशवार्षिकव्रतम्। | १८० धेनवः। | ५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| | पञ्चपुरुषाधिकगामिनीनामासां गमने चान्द्रायणम्। | ८ धेनवः। | २२॥० कार्षापणाः। सार्द्धसप्तधेनुसंकलनात्। | यथाशक्ति। |
| | अभ्यासव्यभिचारिण्याः सकृद्गमने अर्थात् सप्तमपुरुषगामिन्या गमने पराकः। | ५ धेनवः। | १५कार्षापणाः। | यथाशक्ति। |
| | अष्टमादिपुरुषगामिन्या गमने तप्तकृच्छ्रम् | ४ धेनवः। | ११।० कार्षापणाः। पादोनधेनुचतुष्टयस्य ग्राह्यत्वात्। | यथाशक्ति। |